# अष्टमः पाठः  वाचनप्रशंसा । (सरलार्थलेखनार्थम्)

डॉ. ए. पी. जे. अब्दुलकलाममहोदयः 'मिसाईल मॅन' इति बिरुदेन ख्यातः। तस्य जीवने तेन छात्राणां शैक्षणिकविकासार्थं नैके यत्नाः कृताः। १५ ऑक्टोबर इति तस्य जन्मदिनं 'वाचनप्रेरणादिवसरूपेण' आचर्यते । विविधानां ग्रन्थानां, लघुग्रन्थानां, वृत्तपत्राणां वाचनेन मनुष्ये के गुणाः विकसिताः भवन्ति, इत्यादयः विषयाः पद्येऽस्मिन् वर्णिताः सन्ति ।

- पाठ्यपुस्तकं विहाय यूयं किं किं पठथ ?
- साहित्यस्य के प्रकाराः भवन्ति ?
- अपि यूयं प्रतिदिनं वृत्तपत्रं पठथ ?





शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।१।।

मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।२।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ।।३।।

अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।४।।

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।५।।

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।६।।

**१) सन्धिविग्रहाः** – १) विज्ञानमेव = विज्ञानम् + एव। २) उत्साहो वर्धते = उत्साहः + वर्धते ।
**अन्वयः** – येन शीलं, सद्गुणसम्पत्तिः, ज्ञानं, विज्ञानम् उत्साहः च वर्धते तद् वाचनं हितावहम् एव ।

**२) सन्धिविग्रहाः** – १) वाचनेनैव = वाचनेन + एव । २) दक्षा भवन्ति = दक्षाः + भवन्ति ।
**अन्वयः** – मनुजाः वाचनेन एव बहून् विषयान् बोधन्ते । वाचनेन (मनुजाः) कार्येषु दक्षाः बहुश्रुताः (च)भवन्ति।

**३) अन्वयः** – ये सदा वाचने रताः तान् वाल्मीकि–व्यास–बाणाद्याः प्राचीनाः कविपण्डिताः शिक्षयन्ति।

**४) सन्धिविग्रहाः** – १) अद्ययावद्धि = अद्ययावत् + हि । २) पठेत्सदा = पठेत् + सदा ।
३) वाचनमुपकारकम् = वाचनम् + उपकारकम् ।
**अन्वयः** – मनुजः अद्ययावद् ज्ञानाय वृत्तपत्रं सदा हि पठेत् । सर्वविधसुविद्यार्थं वाचनम् उपकारकम् (वर्तते) ।

**५) सन्धिविग्रहाः** –१) कालक्षेपो न = कालक्षेपः + न । २) कर्तव्यो विद्यार्थी = कर्तव्यः + विद्यार्थी।
**अन्वयः** – (विद्यार्थिभिः) वृथाभ्रमण–कुक्रीडा–परपीडा–अपभाषणैः कालक्षेपः न कर्तव्यः । विद्यार्थी वाचनं श्रयेत् ।

**६) अन्वयः** – वाचनं बाल्ये ज्ञानदं, तारुण्ये शीलरक्षकम्, वार्धक्ये दुःखहरणं (भवति) (अतः) सद्ग्रन्थवाचनं हितं (भवति)।

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) वाचनेन के गुणाः वर्धन्ते ?

आ) वाचनेन मनुजाः किं बोधन्ते ?


इ) विद्यार्थिना कथं कालक्षेपः न कर्तव्यः ?

**२. समानार्थकशब्दान् लिखत ।**


शीलम्, दक्षः, रताः, कालक्षेपः, वार्धक्यम्, पण्डितः

**३. जालरेखाचित्रं पूरयत ।**


अ)




आ)




इ)




**४. विरुद्धार्थकशब्दान् लिखत ।**

सद्गुणः, उत्साहः, प्राचीनाः, उपकारकम्

**५. सन्धिविग्रहं कुरुत ।**

अ) वाचनेनैव आ) अद्ययावद्धि

**६. माध्यमभाषया उत्तरं लिखत।**


अ) वाचनम् उपकारकं कथम् इति स्पष्टीकुरुत।

आ) हितं सद्ग्रन्थवाचनम् इति कविः किमर्थं वदति?

**७. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| उपकारकम् | मनुजाः |
| प्राचीनाः | विषयान् |
| दक्षाः | वाचनम् |
| बहून् | कविपण्डिताः |

उपक्रमः




**पठत-बोधत**

**पठनस्य दोषाः**

**गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥**

**उच्चारणविषयकश्लोकः ।**

**व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ॥**

73LH3H